श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४८

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

His Holiness ***śrīmad āṇḍavan*** of ***śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४८

*यमलार्जुनभञ्जनवर्णनम्*

मुदा सुरौघैस्त्वमुदारसम्मदै-
    रुदीर्य दामोदर इत्यभिष्टुतः।
मृदुदरः स्वैरमुलूखले लग-
    न्नदूरतो द्वौ ककुभावुदैक्षथाः॥ १॥

कुबेरसूनुर्नलकूबराभिधः
    परो मणिग्रीव इति प्रथां गतः।
महेशसेवाधिगतश्रियोन्मदौ
    चिरं किल त्वद्विमुखावखेलताम्॥ २॥

सुरापगायां किल तौ मदोत्कटौ
    सुरापगायद्बहुयौवतावृतौ।
विवाससौ केलिपरौ स नारदो
    भवत्पदैकप्रवणो निरैक्षत॥ ३॥

भिया प्रियालोकमुपात्तवाससं
    पुरो निरीक्ष्यापि मदान्धचेतसौ।
इमौ भवद्भक्त्युपशान्तिसिद्धये
    मुनिर्जगौ शान्तिमृते कुतः सुखम्॥ ४॥

युवामवाप्तौ ककुभात्मतां चिरं
    हरिं निरीक्ष्याथ पदं स्वमाप्नुतम्।
इतीरितौ तौ भवदीक्षणस्पृहां
    गतौ व्रजान्ते ककुभौ बभूवतुः॥ ५॥

www.prapatti.com

अतन्द्रमिन्द्रद्रुयुगं तथाविधं
समेयुषा मन्थरगामिना त्वया।
तिरायितोलूखलरोधनिर्धुतौ
चिराय जीर्णौ परिपातितौ तरू॥ ६ ॥

अभाजि शाखिद्वितयं यदा त्वया
तदैव तद्गर्भतलान्निरेयुषा।
महात्विषा यक्षयुगेन तत्क्षणा-
दभाजि गोविन्द भवानपि स्तवैः॥ ७ ॥

इहान्यभक्तोऽपि समेष्यति क्रमात्
भवन्तमेतौ खलु रुद्रसेवकौ।
मुनिप्रसादाद्भवदङ्घ्रिमागतौ
गतौ वृणानौ खलु भक्तिमुत्तमाम्॥ ८ ॥

ततस्तरूद्दारणदारुणारव-
प्रकम्पिसम्पातिनि गोपमण्डले।
विलज्जितत्वज्जननीमुखेक्षिणा
व्यमोक्षि नन्देन भवान् विमोक्षदः॥ ९ ॥

महीरुहोर्मध्यगतो बतार्भको
हरेः प्रभावादपरिक्षतोऽधुना।
इति ब्रुवाणैर्गमितो गृहं भवान्
मरुत्पुराधीश्वर पाहि मां गदात्॥ १० ॥

**********



www.prapatti.com